"अपां समीपे नियतो नैत्यकं विधिमास्थितः ।
सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ॥")

समीपता, स्त्री, नैकट्यम् । समीपत्वम् । सामीप्यम् । समीपशब्दात् तल्प्रत्ययेन निष्पन्नम् ॥

समीयः, त्रि, ( सम + "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः । ) समसम्बन्धी । तुल्यकारणकः । समशब्दात् छीयप्रत्ययेन निष्पन्नः ॥

समीरः, पुं, ( सम्यगीर्त्ते गच्छतीति । सं + ईर गतौ + कः । ) वायुः । इत्यमरः । १ । १ । ६५ ॥ ( यथा, माघे । ४ । ५४ ।
"समीरशिशिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम् ॥")
शमीवृक्षः । इति राजनिर्घण्टः ॥

समीरणः, पुं, (समीरयतीति । सम् + ईर + ल्युः ।) वायुः । ( यथा, कुमारे । १ । ८ ।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम् ॥")
मरुवकः । इत्यमरः ।२।४।७८॥ पथिकः । इति मेदिनी ॥ ( स्त्री, सं + ईर + ल्युट् । प्रेरणम् । यथा, महाभारते । ८ । ८४ । २३ ।
"शराभिघाताच्च रुषा च राजन्
खया च भासाश्वसमीरणाच्च ॥"*॥
प्रेरके, त्रि । यथा, हरिवंशे । १०२ । २२ ।
"सोऽपिबत् पाण्डुराभाभस्तत्कालं ज्ञातिभिर्वृतः ।
वनान्तरगतो रामः पानं मदसमीरणम् ॥")

समुखः, त्रि, ( मुखेन सह वर्त्तमानः । ) वाग्मी । वावदूकः । इति हेमचन्द्रः ॥

समुचितः, त्रि, सम्यगुचितः । उपयुक्तः । यथा,—
"वदामस्त किंवा जननि वयमुच्चैर्जड़धियो
न धाता नापीशो हरिरपि न ते वेत्ति परमम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्माकममिते
तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥"
इति तन्त्रसारधृतश्यामास्तोत्रम् ॥

समुच्चयः, पुं, ( सं + उत् + चि + अच् । ) समाहारः । इत्यमरः । ३ । २ । १६ ॥ यथा,—
"राशौ द्वयोर्वक्तृनाश्च समाहारः समुच्चयः ॥"
इति शब्दरत्नावली ॥
( यथा, कुमारे । १ । ४९ ।
"सर्व्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन ।
सा निर्म्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्य्यदिदृक्षयेव ॥" )

समुच्छेदः, पुं, विनाशः । संपूर्व्वोत्पूर्व्वच्छिदधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ (यथा, किराते ।११।४६।
"वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् ।
निर्व्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥" )

समुच्छ्रयः, पुं, (सं + उत् + श्रि + अच् ।) विरोधः । उत्सेधः । इति मेदिनी ॥ (यथा, रघुः ।६।२०।
"कनकयूपसमुच्छ्रयशोभिनो
वितमसा तमसासरयूतटाः ॥" )

समुच्छ्रायः, पुं, समुच्छ्रयः । समुत्पूर्व्वश्रिधातोर्घञ्प्रत्ययेन निष्पन्नः ॥

समुच्छ्रितः, त्रि, उच्चः । समुत्पूर्व्वश्रिधातोः क्तप्रत्ययेन निष्पन्नः ॥

समुज्झितः, त्रि, (सम् + उज्झ उत्सर्गे + क्तः ।) त्यक्तः । इत्यमरः । ३ । १ । १०७ ॥

समुत्क्रमः, पुं, ऊर्द्ध्वगमनम् । समुत्पूर्व्वक्रमधातोरल्प्रत्ययेन निष्पन्नः ॥

समुत्क्रोशः, पुं, ( समुत्क्रोशतीति । सं + उत् + क्रुश + अच् । ) कुररपक्षी । इति शब्दरत्नावली ॥ ( भावे घञ् । ) उच्चैःशब्दश्च ॥

समुत्थः, त्रि, ( समुत्तिष्ठतीति । सं + उत् + स्था + कः । ) समुद्भवः । समुत्थितः । समुत्पूर्व्वस्थाधातोर्डप्रत्ययेन निष्पन्नः ॥ ( यथा, मनुः । ७ । ४५ ।
"दश कामसमुत्थानि तथाष्टौ क्रोधजानि च ।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत् ॥")

समुत्थानं, क्ली, (सम् + उत् + स्था + ल्युट् ।) समुद्योगः । ( यथा, महाभारते ।३।३२।७।
"सर्व्वे हि स्वं समुत्थानमुपजीवन्ति जन्तवः ।
अपि धाता विधाता च यथायमुदके वकः ॥" )
व्याधीनां निर्णयः । इति मेदिनी ॥ ( यथा, मनुः । ८ । २८७ ।
"अङ्गावपीड़नायाञ्च व्रणशोणितयोस्तथा ।
समुत्थानव्ययं दाप्यः सर्व्वदण्डमथापि वा ॥")
ऊर्द्ध्वगमनम् । सम्यक्प्रकारेण उत्थानम् ॥ उत्तोलनम् । यथा,—
"इन्द्रध्वजसमुत्थानं प्रमादान्न कृतं यदि ।
तदा द्वादशमे वर्षे कर्त्तव्यं नान्तरा पुनः ॥"
इति तिथ्यादितत्त्वम् ॥

समुत्थितः, पुं, ( सम् + उत् + स्था + क्तः ।) सम्यगुत्थितः । यथा,—
"समुत्थितस्त्वं श्रवणादपादे
गृहाण पूजां भगवन्नमस्ते ॥"
इति तिथ्यादितत्त्वे शक्रोत्थानपूजामन्त्रः ॥

समुत्पन्नः, त्रि, ( सम् + उत् + पद + क्तः । ) समुद्भूतः । यथा,—
"पुस्तकस्था च या विद्या परहस्तगतं धनम् ।
कार्य्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥"
इति चाणक्यम् ॥

समुत्पिञ्जः, त्रि, (सम + उत् + पिजि हिंसायाम् + अच् ।) अत्यन्ताकुलः । यथा,—
"उत्पिञ्जलसमुत्पिञ्जपिञ्जला भृशमाकुले ॥"
इति हेमचन्द्रः ॥

समुत्पिञ्जः, पुं, (सम् + उत् + पिञ्ज + पचाद्यच् ।) भृशमाकुलसैन्यम् । इत्यमरः । २ । ८ । ९९ ॥

समुत्सुकः, त्रि, (सम्यगुत्सुकः ।) सम्यगुत्कण्ठितः । इति हेमचन्द्रे उत्सुकशब्दार्थदर्शनात् ॥ सम्यगिष्टार्थोद्युक्तः । इत्यमरे उत्सुकशब्दार्थदर्शनात् ॥ ( यथा, रघुः । १ । ३३ ।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ॥")

समुदक्तं, त्रि, ( समुदच्यते स्मेति । सम् + उत् + अन्च + क्तः । ) उद्धृतम् । कूपादेरुद्धृतजलादि । इत्यमरः । ३ । १ । ९० ॥

समुद्भूतः, त्रि, ( सम् + उत् + भू + क्तः । ) समुत्पन्नः । यथा, देवीमाहात्म्ये ।
"साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिस्तूयतेऽत्र का ।
शरीरकोषतश्चास्याः समुद्भूताब्रवीच्छिवा ॥"

समुदयं, क्ली, ( सम् + उत् + इण् + अच् । ) लग्नम् । यथा,—
"सामर्थ्यं तनु कल्पते समुदये वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं तृतीयभवने योधश्च सञ्चिन्तयेत् ॥"
इत्यादि ज्योतिस्तत्त्वम् ॥
षष्ठाड़ीचक्रान्तर्गतचतुर्थनाड़ी । सा तु जन्मनक्षत्रावधिकाष्टादशनक्षत्ररूपा । तत्पर्य्यायः । सामुदायिकम् २ । यथा, ज्योतिस्तत्त्वे ।
"जन्मर्क्षं कर्म्म ततो दशमं सांघातिकं षोड़शभम् ।
समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
सन्त्यजे सामुदायिके मित्रभूतार्थसंचयः ॥"

समुदयः, पुं, (सम् + उत् + इण् + अच् ।) समूहः । इत्यमरः । २ । ५ । ४० ॥ (यथा, कथासरित्सागरे । १० । १६६ ।
"तमुपाजग्मतुस्तौ च सेनासमुदयान्वितौ ।
तं विज्ञायैव संबन्धं मुदा दुहितृवत्सलौ ॥")
युद्धम् । (यथा, महाभारते । ६ । ११३ । ४४ ।
"द्रोणः पाञ्चालपुत्त्रेण समागम्य महारणे ।
महासमुदयं चक्रे शरैः सन्नतपर्व्वभिः ॥" )
समुद्गमः । इति मेदिनी ॥ दिवसः । इति शब्दचन्द्रिका ॥

समुदागमः, पुं, (सम् + उत् + आ + गम + घञ् ।) समन्ताज्ज्ञानम् । इति त्रिकाण्डशेषः ॥

समुदाचारः, पुं, ( सम् + उत् + आ + चर + घञ् । ) आशयः । इति त्रिकाण्डशेषः ॥

समुदायः, पुं, ( सम् + उत् + अय + घञ् । ) समूहः । युद्धम् । इत्यमरः । २ । ५ । ४० ; २ । ८ । १०६ ॥ पृष्ठस्थायिवलम् । इत्यजयः ॥ समुच्छ्रयः । इति मेदिनी ॥

समुदितः, त्रि, सम्यक्प्रकारेण कथितः । संपूर्व्ववदधातोः क्तप्रत्ययेन निष्पन्नः । उदयं प्राप्तः । समुद्गतः । संपूर्व्वोत्पूर्व्वेणधातोः क्तप्रत्ययेन निष्पन्नः ॥

समुद्गः, पुं, ( समुद्गच्छतीति । सम् + उत् + गम + अन्येष्वपीति डः । ) सम्पुटकः । इति हेमचन्द्रः ॥ ( यथा, रामायणे । २ । ९१ । ७५ ।
"शुक्लांश्चन्दनकल्कांश्च समुद्गेष्ववतिष्ठतः ॥"
मुद्गेन सह वर्त्तमानः । ) मुद्गसहितश्च ॥

समुद्गकः, पुं,(समुद्ग एव । स्वार्थे कन् ।) सम्पुटकः । इत्यमरः । २।६।१३९ ॥ सौपुड़ा इति ख्याते । समुद्गच्छतीति घनजनाद्भावादिरिति डे समुद्गः ततः स्वार्थे कः । सम्पुटति हर्षैः संश्लिष्टो भवति सम्पुटकः पुट श्लेषे इगुपधत्वात् कः ततः